# Chapter 6: Second Stage of Yogic Flying

वसिष्ट उवाच ।
अणुतां स्थूलतां वापि यथा गच्छति योगिनाम्
देहो नाम तथा सम्यग्वक्ष्यमाणमिदं शृणु १
हृद्यब्जचक्रकोशोर्ध्वं प्रस्फुरत्यानलः कणः
हेमभ्रमरवत्सान्ध्यविद्युल्लव इवाम्बुदे २
स प्रवर्धनसंवित्त्या वात्ययेवाशु वर्धते
संविद्रूपतया नूनमर्कवद्याति चोदयम् ३
संध्याभ्रप्रथमार्काभो वृद्धिमभ्यागतः क्षणात्
गालयत्यखिलं साङ्गं देहं हेम यथानलः ४
जलस्पर्शासहो युक्त्या गलयेत्प्रपदादपि
बाह्य एवानलस्पर्शात्स्वान्ते वस्तुविशेषतः ५
स शरीरद्वयं पश्चाद्विधूय क्वापि लीयते
विक्षोभितेन प्राणेन नीहारो वात्यया यथा ६
आधारनाडीनिर्हीना व्योमस्थैवावशिष्यते
शक्तिः कुण्डलिनी वह्नेर्धूमलेखेव निर्गता ७
क्रोडीकृतमनोबुद्धिमयजीवाद्यहंकृतिः
अन्तःस्फुरच्चमत्कारा धूमलेखेव नागरी ८
बिसे शैले तृणे भित्तावुपले दिवि भूतले
सा यथा योज्यते यत्र तेन निर्यात्यलं तथा ९
संवित्तिः सैव यात्यङ्ग रसाद्यन्तं यथाक्रमम्
रसेनापूर्णतामेति तन्त्रीभार इवाम्बुना १०
रसापूर्णा यमाकारं भावयत्याशु तत्तथा
धत्ते चित्रकृतो बुद्धौ रेखा राम यथा कृतिम् ११

दृढभाववशादन्तरस्थीन्याप्नोति सा ततः
मातृगर्भनिषण्णेषु सुसूक्ष्मेवाङ्कुरस्थितिः १२
यथाभिमतमाकारं प्रमाणं वेत्ति राघव
जीवशक्तिरवाप्नोति सुमेर्वादि तृणादि च १३
श्रुतं त्वया योगसाध्यमणिमाद्यर्थसाधनम्
ज्ञानसाध्यमिदानीं त्वं शृणु श्रवणभूषणम् १४
एकं चिन्मात्रमस्तीह शुद्धं सौम्यमलक्षितम्
सूक्ष्मात्सूक्ष्मतरं शान्तं न जगन्न जगत्क्रिया १५
तच्चिनोत्यात्मनात्मानं संकल्पोन्मुखतां गतम्
यदा तदा जीव इति प्रोक्तमाविलतां गतम् १६
असत्यमेव संकल्पभ्रमेणेदं शरीरकम्
जीवः पश्यति मूढात्मा बालो यक्षमिवोद्धतम्
१७
यदा तु ज्ञानदीपेन सम्यगालोक आगतः
संकल्पमोहो जीवस्य क्षीयते शरदभ्रवत् १८
शान्तिमायान्ति देहोऽयं सर्वसंकल्पसंक्षयात्
तदा राघव निःशेषं दीपस्तैलक्षये यथा १९
निद्राव्यपगमे जन्तुर्यथा स्वप्नं न पश्यति
जीवो हि भाविते सत्ये तथा देहं न पश्यति २०
अतत्त्वे तत्त्वभावेन जीवो देहावृतः स्थितः
निर्देहो भवति श्रीमान् सुखी तत्त्वैकभावनात् २१
अनात्मनि शरीरादावात्मभावनमङ्ग यत्
सूर्याद्यालोकदुर्भेदं हार्दं तद्दारुणं तमः २२

आत्मन्येवात्मभावेन सर्वव्यापि निरञ्जनम्
चिन्मात्रममलोऽस्मीति ज्ञानादित्येन नश्यति २३
अन्ये च विदितात्मानो भावयन्ति यथैव यत्
तत्तथैवाशु पश्यन्ति दृढभावनया तया २४
दृढभावानुसंधानाद्विमूढा अपि राघव
विषं नयन्त्यमृततताममृतं विषतामपि २५
एवं यथा यदेवेह भाव्यते दृढभावनात्
भूयते हि तदेवाशु तदित्यालोकितं मुहुः २६
सत्यभावनदृष्टोऽयं देहो देहो भवत्यलम्
दृष्टस्त्वसत्यभावेन व्योमतां याति देहकः २७
अणिमादिपदप्राप्तौ ज्ञानयुक्तिरिति श्रुता
भवता साधुना राम युक्तिमन्यामिमां शृणु २८
रेचकाभ्यासयोगेन जीवः कुण्डलिनीगृहात्
उद्धृत्य योज्यते यावदामोदः पवनादिव २९
त्यज्यते विरतस्पन्दो देहोऽयं काष्ठलोष्टवत्
देहेऽपि जीवेऽपि मतावासेचक इवादरः ३०
स्थावरे जंगमे वापि यथाभिमतयेच्छया
भोक्तुं तत्संपदं सम्यग्जीवोऽन्तर्विनिवेश्यते ३१
इति सिद्धिश्रियं भुक्त्वा स्थितं चेत्तद्वपुः पुनः
प्रविश्यते स्वमन्यद्वा यद्यत्तात विरोचते ३२
देहादयस्तथा बिम्बान्व्याप्तवत्याखिलानथ
संविदा जगदापूर्य संपूर्णं स्थीयतेऽथवा ३३
ज्ञात्वा सदाभ्युदितमुज्झितदोषमीशो

यद्यद्यथा समभिवाञ्छति चित्प्रकाशः
प्राप्नोति तत्तदचिरेण तथैव राम
सम्यक्पदं विदुरनावरणत्वमेव ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे
वाल्मीकीये मोक्षोपायेषु निर्वाणप्रकरणे
अणिमादिलाभयोगोपदेशो नाम
द्व्यशीतितमः सर्गः ८२